**नेत्र** न० नयति नीयते वाऽनेन ष्ट्रन् । १मन्थनदामनि २वस्त्रभेदे ३वृक्षमूले ४रथे ५जटायाम् ६नाड्याम् मेदि० । ७चक्षुषि अमरः । ८प्रापयितरि ९नयनसाधने १०प्रवर्त्तके च त्रि० । ११वस्तिशलाकायां राजनि० । १२चक्षुर्गोलकावस्थिते वह्निदैवताके तैजसे इन्द्रियभेदे न० "विजित्य नेत्रप्रतिघातिनीं प्रभाम्" कुमा० तत्र अग्निमन्थनदामनि "व्यामप्रमाणं नेत्रं स्यात् प्रमथ्यस्तेन पावकः" कर्मप्रदीपे कात्या० "मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम्" भा०आ० १८अ० । चक्षुषि "नेत्रे दूरमनङ्गने पुलकिता तन्वी तवेयं तनुः" सा०द० । १३हैहयन्टपपुत्रभेदे पु० "धर्मस्तु हैहयसुतो नेत्रः कुन्तिपिता ततः" भाग०९।२३।६६। १४द्वित्वसंख्यायां न० "मुनिषड्यमनेत्राणि (२२६७) सू० सि० व्याङ्कपिण्डोक्तौ । वस्तिशलाकामानादि सुश्रुते उक्तं यथा "अथातो नेत्रवस्तिप्रमाणप्रविभागचिकित्सितं व्याख्यास्यामः" इत्युपक्रमे सप्रपञ्चमुक्त्वा नेत्रप्रमाणादि उक्तं यथा "षड्विंशतेरूर्द्ध्वं द्वादशाङ्गुलं मूलेऽङ्गुष्ठोदरपरीणाहमग्रे कनिष्ठिकोदरपरीणाहमग्रे त्र्यङ्गुलसन्निविष्टकर्णिकं गृध्रपत्रनाडीतुल्यप्रवेशं कोलास्थिमात्रं छिद्रं क्लिन्नकलायमात्रं छिद्रमित्येके । सर्वाणि मूले वस्तिनिबन्धनार्थं द्विकर्णिकानि । आस्थापनद्रव्यप्रमाणं तु विहिता द्वादशप्रसृतयः । सप्ततेस्तूर्द्ध्वं नेत्रप्रमाणमेतदेव द्रव्यप्रमाणन्तु दिरष्टवर्षवत् । तत्र नेत्राणि सुवर्णरजतताम्रायोरीतिदन्तशृङ्गमणितरुसारमयाणि श्लक्ष्णानि दृढानि गोपुच्छाकृतीन्यृजूनि गुटिकामुखानि । वस्तयस्त्वष्टानां मृदवो नातिबहुला दृढाः प्रमाणवन्तो गोमहिषवराहाजोरभ्राणाम्" । "नेत्रालाभे हिता नाड़ी नलवंशास्थिसम्भवा । वस्त्यलाभे हितं चर्म सूक्ष्मं वा तान्तवं घनम्" । वस्तिशलाकारूपं च उत्तरवस्तिशब्दे १०६८० पृ० सुश्रुतोक्तं दृश्यम् । "चतुर्दशाङ्गुलं नेत्रमातुराङ्गुलमानतः" इत्यादिनोक्तं दृश्यम् । "कृत्वा सूक्ष्मेण नेत्रेण चक्रतैलेन तर्पयेत्" सुश्रुतः ।

**नेत्रकोष** पु० ६त० । नेत्रपटले

**नेत्रच्छद** पु० नेत्रं छाद्यते अनेन छद+णिच्–क ह्रस्वः । नेत्रपिधायके चर्ममये नेत्रपुटे (चकेरपाता) अमरः ।

**नेत्रपर्य्यन्त** पु० नेत्रयोः पर्यन्तः कोणसीमा । १अपाङ्गे राजनि० । २नेत्रावधिके त्रि० ।

**नेत्रपाक** पु० नेत्ररोगभेदे तल्लक्षणं सुश्रुते उक्तं यथा "कण्डूपदेहाश्रुयुतः पक्वोदुम्बरसन्निभः । दाहसंहर्षताम्रत्वशोफनिस्तोदगौरवैः । जुष्टो मुहुः स्रवेदास्रमुष्णशीताम्बु पिच्छिलम् । संरम्भी पच्यते यश्च नेत्रपाकः स शोफजः । शोफहीनानि लिङ्गानि नेत्रपाके त्वशोफजे । अन्तःसिराणां श्वसनः स्थितो दृष्टिं प्रतिक्षिपन् । हताधिमन्थं जनयेत्तमसाध्यं विदुर्बुधाः" ।

**नेत्रपिण्ड** पुंस्त्री नेत्रं पिण्ड इव यस्य । विडाले हारा० स्त्रियां जातित्वात् ङीष् । ६त० । नेत्रगोलके न० ।

**नेत्रपुष्कर** न० नेत्रस्य पुष्करं जलं यस्याः ५ब० । रुद्रजटायां राजनि० । तत्सेवने हि नेत्रात् जलं स्रवतीति तस्यास्तथात्वम् ।

**नेत्रप्रबन्ध** पु० नेत्रे प्रबध्येते अनेन प्र+बन्ध–करणे ल्युट् । नेत्रपुटे "कर्णस्रोतः सुकुमारकं च नेत्रप्रबन्धमयम्" सु०सं० ५८अ० ।

**नेत्रबन्ध** पु० ६त० । पृष्ठतोऽलक्षितेनागत्य करतलाभ्यां नेत्रयोः पिधानरूपे बालानां क्रीड़ाभेदे "बद्धनेत्रबन्धाद्यैः क्वचिन्मृगखगेहया" भा० १०।१८।८ रामकृष्णयोर्बालक्रीडावर्णने ।

**नेत्रमल** न० ६त० । चक्षुर्मले दूषिकायाम् (पिँचुटि) अमरः ।

**नेत्रमीला(ना)** स्त्री नेत्रयोः मीला मुद्रणं यस्याः ५ब० पृषो० वा लस्य नः, लान्तपाठः साधुः । यवतिक्तायां राजनि० । तत्सेवने हि नेत्रयोर्मीलनं जायते इति तस्यास्तथात्वम् ।

**नेत्रमुष्** त्रि० नेत्रं तत्प्रचारं मुष्णाति मुष–क्विप् । दृष्टेरुपघातके दृष्टिप्रचारनाशके "वहन्ति ये नेत्रमुषं दिव्यं मायामयं रथम्" भा०व० ४२अ० ।

**नेत्रयोनि** पु० नेत्राणि योनय इवास्य । १इन्द्रे शब्दमाला । नेत्रमत्रिनेत्रं योनिरुत्पत्तिस्थानं यस्य । २चन्द्रे च

**नेत्ररञ्जन** न० नेत्रे रज्यते अनेन रन्ज–करणे ल्युट् । कज्जले "एष वा कथितो धूपः शृणु तं नेत्ररञ्जनम्" कालिकापु० ६१अ० ।

**नेत्ररुज्** स्त्री ६त० । नेत्ररोगे

**नेत्ररोग** पु० ६त० । नयनस्य रोगभेदे तन्निदानादि माधवकरेणोक्तं यथा "उष्णाभितप्तस्य जलप्रवेशाद्दूरेक्षणात् स्वप्नविपर्ययाच्च । स्वेदाद्रजोधूमनिषेवणाच्च छर्देर्विघाताद्वमनातियोगात् । द्रवात्तथान्नान्निशि सेवितात्त्व विण्मूत्रवातक्रमनिग्रहाच्च । प्रसक्तसंरोदनशोककोपाच्छिरोऽभिघातादतिमद्यपानात् । तथा ऋतूनाञ्च विपर्ययेण